# 56 - षट्पञ्चाश दशकम्
# कालिय गर्व शमनम्, भगवदनुग्रहम् च

रुचिर कम्पित कुण्डल मण्डल: सुचिर मीश न नर्तिथ पन्नगे ।
अमर ताडित दुन्दुभि सुन्दरं वियति गायति दैवत यौवते ॥ ॥56-1॥

नमति यत्यद मुष्य शिरो हरे परि-विहाय तदुन्नत मुन्नतम् ।
परिमथन् पद पङ्करुहा चिरं व्यहरथा: कर ताल मनोहरम् ॥ ॥56-2॥

त्वदवभग्न विभुग्न फणा गणे गलित शोणित शोणित पाथसि ।
फणिपता ववसीदति सन्नता: तदबलास् तव माधव पादयो: ॥ ॥56-3॥

अयि पुरैव चिराय परिश्रुत त्व दनुभाव विलीन हृदो हि ता: ।
मुनिभिरप्य नवाप्य पथैस् तवै: नुनुवुरीश भवन्त मयन्त्रितम् ॥ ॥56-4॥

फणि वधू गण भक्ति विलोकन प्रविकसत् करुणाकुल चेतसा ।
फणिपतिर् भवताऽच्युत जीवित: त्वयि समर्पित मूर्ति रवानमत् ॥ ॥56-5॥

रमणकं व्रज वारिधि मध्यगं फणि रिपुर् न करोति विरोधि-ताम् ।
इति भवत् वचनान्यति मानयन् फणिपतिर् निरगा दुरगै: समम् ॥ ॥56-6॥

फणि वधू जन दत्त मणि व्रज ज्वलित हार दुकूल विभूषित: ।
तट गतै: प्रमदाश्रु विमिश्रितै: समगथास् स्वजनैर् दिव सावधौ ॥ ॥56-7॥

निशि पुनस् तमसा व्रज मन्दिरं व्रजितु मक्षम एव जनोत् करे ।
स्वपति तत्र भवच् चरणाश्रये दव कृशानु ररुन्ध समन्तत: ॥ ॥56-8॥

प्रबुधिता नथ पालय पालयेति उदय दार्त रवान् पशु पालकान् ।
अवितु माशु पपाथ महानलं किमिह चित्रमयं खलु ते मुखम् ॥ ॥56-9॥

शिखिनि वर्णत एव हि पीतता परि लसत्यधुना क्रिययाऽप्यसौ ।
इति नुतः पशुपैर् मुदितैर् विभो हर हरे दुरितैस् सह मे गदान्॥56-10॥

॥ सदा सर्वत्र गोविन्द नाम संकीर्तनम् गोविन्दा....गोविन्दा ॥
॥ श्री गुरुवायूरप्पा शरणम् श्री हरये नमः॥